# Matribhume Sada Shakti Sancharike

# માતૃભૂમે સદા શક્તિસઞ્ચારિકે

## Document Information

Text title : Matribhume Sada Shakti Sancharike

File name : mAtRRibhUmesadAshaktisanchArike.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Matribhume Sada Shakti Sancharike

# માતૃભૂમે સદા શક્તિસઞ્ચારિકે

(ગીતિકા)

માતૃભૂમે । સદા શક્તિ-સઞ્ચારિકે ।
 પાદપદ્મે શુભે તે નતિ સન્તતમ્ ।
જ્ઞાન-જ્યોતિ-પ્રસૂ સૌખ્ય-સઞ્ચારિણી
 દુઃખ-દાવાગ્નિ-હર્ત્રી મનોમોહિની ॥ માતૃભૂમે૦॥

ત્વં હિ ક્રાન્તિ સદા ન્યાય-રક્ષા-પરા
 શત્રુ-સમ્મર્દની ક્રૂર-માનાપહા ।
જ્ઞાન-શક્તિ-પ્રદા ઉદ્યમાધાયિની
 શક્તિ સ્રોત-સ્વરુપા સુખાધાયિની ॥ માતૃભૂમે૦॥

પાવનં તે રજઃસર્વ-સૌખ્યાકરં
 ક્રાન્તિદૂતૈઃ શિરોભિઃ સદા ધારિતમ્ ।
શક્તિદં શૌર્યદં ભક્તિદં મુક્તિદં
 જ્ઞાનદં માનદં તાપહં પાપહમ્ ॥ માતૃભૂમે૦॥

પાવનં તે પયો દુગ્ધ-ધારોપમં
 પાવનં તે વનં પાવના પર્વતા ।
પાવની તે સરિદ્ વૃક્ષમાલા શુભા
 પાવનં તે સમસ્ત મત સૌખ્યદમ્ ॥ માતૃભૂમે૦॥

પાવન તે પ્રસૂન સુગન્ધાવહ
 પાવન ક્ષેતમેતત્ સુસસ્યૈર્વૃત્તમ્ ।
પાવન તે દિન પાવની યામિની
 પાવન કન્દમૂલ ફલ સૌખ્યદમ્ ॥ માતૃભૂમે૦॥

યત્ર હૈમો ગિરિસ્તે કિરીટપ્રભો
 નાગ-કશ્મીર-ભૂસ્તે ભુજો સમતૌ ।
યત્ર ગઙ્ગા સદા રક્ત-સઞ્ચારિકા

વિન્ધ્યમાલા મતા પૃષ્ઠવંશોપમા ॥ માતૃભૂમે૦ ॥

ગુર્જરાન્ધ્રૌ મતી યત્ર જઙ્ઘોપમૌ

મધ્યદેશ ૩ કટિ સર્વશોભાવૃત ।

કેરલસ્તામિલ પાદરૂપી મતો

સાગરેણાર્ચિત પાદયુગ્મ શુભમ્ ॥ માતૃભૂમે૦ ॥

વિશ્વવન્દ્યા સદા ત્વં ગુણૈર્રચિતા

જ્ઞાનજ્યોતિ પ્રદાઽઽઅધ્યાત્મ-સન્દેશિકા ।

સત્યનિષ્ઠા સદા સત્યશિક્ષાપરા ।

સત્યધર્મોદયા સર્વધર્મપ્રિયા ॥ માતૃભૂમે૦ ॥

વિશ્વશાન્તિ સદા તે મતં સમ્મતં

વિશ્વવન્ધુત્વશિક્ષા સદા તે પ્રિયા ।

ત્વં તુ વિશ્વં કુટુમ્બં સદા મન્યસે

જ્ઞાનદાત્રી સદા પાપહર્ત્રી મતા ॥ માતૃભૂમે૦ ॥

ક્રાન્તિ-સઞ્ચારિણી દુષ્ટ-સંહારિણી

સૌખ્ય-સન્ધારિણી દુઃખ-તે હારિણી ।

શક્તિરુપા સદા ભક્તિરૂપા પ્રિયા

જીવનં મેઽર્પિતં તેઽઽઙ્ઘ્રિયુગ્મે શુભે ॥ માતુભૂમે૦ ॥

Proofread by Mandar Mali

*Matribhume Sada Shakti Sancharike*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*